1

सामवेद०
नं २

श्रीगणेशाय नमः ॥ श्रीरामचन्द्र षोडशपूजा ॥ पृक्षस्य वृष्णो अरुष पूजा
स्य नू सहः प्र नो वचो विदथा जातवेदसे ॥ वैश्वानराय मतिर्नव्यसे शुचिः नं २
सोम इव पवते चारुरग्नये ॥१॥ इत्यावाहनम् ॥ सं ते इन्द्राय यज्य
वे वरुणाय मरुद्भ्यः ॥ वरिवोवित्परि स्रव ॥२॥ इत्यासनम् ॥
॥१॥ प्र ते दिवोदासो अग्निर्देव इन्द्रो न मज्मना ॥ अनु मातरं पृथिवीं ॥१॥
वि वावृते तस्थौ नाकस्य शर्मणि ॥३॥ इति पाद्यम् ॥ तिस्रो वाच
उदीरते गावो मिमन्ति धेनवः ॥ हरिरेति कनिक्रदत् ॥४॥ इत्याचम
नम् ॥ आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः ॥ वाजेभिरुप
नो हवम् ॥५॥ इति अर्घम् ॥ तरत्स मन्दी धावति धारा सुतस्यान्धसः
॥ तरत्स मन्दी धावति ॥ उस्रा वेद वसूनां मर्तस्य देव्यवसः ॥ ॥
तरत्स मन्दी धावति ॥६॥ स्नानम्

श्रीरामचन्द्र क०
सामवेद०

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायैवा रात्र्युषसे योनिमारैक ॥१४॥ इति
दीपम् ॥ यदूर्चो हिरण्यस्य यद्वा वर्चो गवामुत । सत्यस्य ब्रह्मणो
वर्चस्तेन मा सं सृजामसि ॥१५॥ इति नैवेद्यम् ॥ आ ते द
॥२॥ त्सं मे यो भुवं चन्द्रि मघा करीमहे । पान्तमापुरुस्पृहम् ॥१६॥ इ
ति प्रदक्षिणा ॥ विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरं गोपामृतस्य
विर्भरत् ॥१७॥ इति विसर्जनम् ॥

2

अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ॥ अभि चन्द्रा

भर्त्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥७॥ इति वस्त्रपरिधानम्

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ॥ प्रप्र वयममृतं जातवेदसं प्रि

यं मित्रं न शंसिषम् ॥८॥ इति यज्ञोपवीतम् ॥ दुहानः प्रत्नमित्पयः

पवित्रपरिषिच्यते ॥ क्रन्दं देवाँ अजीजनः ॥९॥ इति चन्दनम् ॥ अंसो वयं

धुर्मदापा सुदक्षो गिरिष्ठाः ॥ श्येनो न योनिमासदत् ॥ इति अक्षतम् ॥

एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् ॥ कृष्टीर्यो विश्वा अभ्य

स्त्येक इत् ॥११॥ इति तुलसीम् ॥ पवित्रं ते विततं ब्रह्मणस्पते प्रभु

र्गात्राणि पर्येषि विश्वतः ॥ अतप्ततनूर्न तदामो अश्नुते शृं

तास इद्वहन्तः संतदाशत ॥१२॥ इति पुष्पम् ॥ अग्ने त्वं हि रोच

नास्य प्रारणारणनती ॥ धूपं त्वं माहि जो दिवम् ॥१३॥ इति धूपम्